CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥ ७ ॥ अथ हरितालिकापूजाप्रारंभः ॥ ७ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥अथहरितालिकापूजाप्रारंभः॥सु
मुखश्चेत्यादि०॥ममइहजन्मनिजन्मांतरेचसमस्तपा
पक्षयपूर्वकसप्तजन्मराज्यसौभाग्यादिवृद्धयेउमा
महेश्वरसापूज्यतासिध्यर्थंहरितालिकापूजनंकरि
ष्ये॥आदौगौरीयुक्तंमहेश्वरंपूजयिष्ये॥कलशपूज
नादिकरिष्ये॥अथध्यानं॥पीतकौशेयवसनांहेमाभां
कमलासनां॥भक्तानांवरदांनित्यंपार्वतीचिंतयाम्य
हं॥मंदारमालांकलितालिकायैकपालशालांकितशे
खरायदिव्यांबरायैचदिगंबरायनमःशिवायैचनमः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिवाय॥इतिध्यानं॥देवदेवविसमागछ प्रार्थयेहंजग
न्मये॥इमांमयाकृतांपूजांगृहाणसुरसत्तमैः॥शिवगौ
रीभ्यांनमः॥आवाहनं॥भवानीत्वंमहादेवीसर्वसौभा
ग्यदायके॥अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां॥
आसनं॥सुचारुशीतलंदिव्यंनानागंधसमन्वितं॥
गृहाणदेवदेवेशिमहादेविनमोस्तुते॥पाद्यं॥श्रीपा
र्वतीमहाभागेशंकरप्रियवादिनी॥अर्घ्यंगृहाणक
ल्याणिभर्तासहपतिव्रते॥अर्घ्यं॥गंगाजलंसमानी
तंसुवर्णकलशेस्थितं॥आचंम्यतांमहाभागेरुद्रेण

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सहितेन घे॥आचमनीयं॥गंगासरस्वतीरेवापयोष्णीन
र्मराजलैः॥स्नापितोसिमयादेवतथाशांतिंकुरुष्वमे॥
स्नानं॥पंचामृतस्नानं॥सुरभिस्तुसमुत्पन्नंदेवानाम
पिदुर्लभं॥पयोदद्यामिदेवेशस्नानार्थंप्रतिगृह्यतां॥
पयस्नानं॥चंद्रमंडलसंकाशंसर्वदेवप्रियंदधि॥द
ध्यादद्यामिदेवेशस्नानार्थंप्रतिगृह्यतां॥दधिस्नानं
॥आज्यंसुराणामाहारमाज्यंयज्ञेप्रतिष्ठितं॥आज्यं
परमपवित्रंस्नानार्थंप्रतिगृह्यतां॥घृतस्नानं॥स
र्वौषधिसमुत्पन्नंपीयूषःसदृशंदधि॥मधोदद्यामिदे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

वेरास्नानार्थंप्रतिगृह्यतां॥मधुस्नानं॥इक्षुदंडसमुद्
भूतंशर्करामधुराविभो॥देवदेवप्रियंस्वादुस्नानार्थंप्र
तिगृह्यतां॥शर्करास्नानं॥षष्ठेनगंधोदकस्नानं॥गंगा
दिभ्योनादीभिश्चसमानीतमिदंजलं॥स्नानार्थंतुम
यादेवीप्रीत्यातत्प्रतिगृह्यतां॥शुद्धोदकस्नानं॥पंचो
पचारपूजांकृत्वा॥अभिषेकंकुर्यात्॥स्नानांतरेणआ
चमनीयं॥क्षीरोदमथनोद्भूतेचंद्रलक्ष्मीसहोदरे॥ग्र
ह्यतांपरिधानार्थंइमंक्षौमंवरंशुभे॥कंचुकी॥वस्त्र
चसोमदेवत्यंलज्जायास्तुनिवारणं॥मयोपपादितंतु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भ्यंवाससीप्रतिगृह्यतां॥वस्त्रं॥कार्पासंसूत्रमुत्तमंयज्ञब्रह्म
सूत्रंकृतंमया॥ब्रह्मग्रंथिकृतंतस्यउत्तरीप्रतिगृह्यतां॥
यज्ञोपवीतं॥हरिद्रापीतवर्णाभांकामिनींकामसंभवां
॥हरिद्रेयाचितेदेवीसौभाग्यार्थंप्रयछमे॥हरिद्रां॥कुं
कुमंकामुकंदिव्यंस्त्रीणांभालस्यभूषणं॥कुंकुमंचर्चि
तेदेवीसौभाग्यार्थंप्रयछमे॥कुंकुमं॥कज्जलंदीपसंभू
तंस्त्रीणांलोचनभूषणं॥नेत्रयोर्भूषणार्थायकज्जलं
प्रतिगृह्यतां॥कज्जलं॥कर्पूरागरुसंघृष्टंकुंकुमादिस
मन्वितं॥कस्तूरिकासमायुक्तंचंदनंप्रतिगृह्यतां॥चं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दनं॥रंजिताःकुसुमोघेनअक्षताःश्वातिशोभनाः॥ममै
षांहेविद्यानेनप्रसन्नाभवपार्वती॥अक्षताः॥मल्लिका
बकुलचंपकपाटलाब्जपुन्नागजातिकरवीररसाल
पुष्पैः॥बिल्वप्रवालतुलसीदलमालतीभिःत्वांपूजु
यामिजगदीश्वरीमेप्रसीद॥पुष्पं॥अथांगपूजा॥भ
वान्यैनमः॥पादौपूजयामि॥सर्वाण्यैनमः॥जंघेपू०
॥सुंदर्यैनमः॥उदरंपू०॥भगवत्यैनमः॥हृदयंपू०॥का
मदायैनमः॥स्तनौपू०॥शिवप्रियायैनमः॥कुक्षौपू०
॥लक्ष्म्यैनमः॥बाहुंपू०॥पद्महस्तायैनमः॥हस्तौपू०॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मंगलमोदिन्येनमः॥कंठंपूजयामि॥विरूपायेनमः॥मु
खंपू०॥ज्ञानरूपायेनमः॥नेत्रेपू०॥रमायेनमः॥कर्णौपू०
॥कल्याण्येनमः॥भालंपू०॥दुर्गायेनमः॥शिरःपू०॥पा
र्वत्येनमः॥सर्वांगंपूजयामि॥अथशंकरपूजा॥महा
देवायनमः॥पादौपू०॥कृत्तिवासायनमः॥जानुंपू०॥
पिनाकिनेनमः॥कटिंपू०॥सर्वायनमः॥नाभिंपू०॥शं
भवेनमः॥हृदयंपू०॥कंठेशायनमः॥कंठंपू०॥त्रिपुरां
तकायनमः॥भालंपू०॥गिरीशायनमः॥नेत्रेपू०॥
गिरिजायनमः॥कर्णौपू०॥भालचंद्रायनमः॥शिरः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पू०॥सर्वेश्वरायनमः॥सर्वांगंपू०॥अग्निपत्रिपूजा॥उमा
येनमः॥अपामार्गपत्रंसमर्पयामि॥गौर्यैनमः॥दूर्वा
पत्रंस०॥दिव्येनमः॥धत्तूरपत्रं०॥लोकवंद्येनमः॥बिल्व
पत्रंसमर्पयामि॥कात्येनमः॥पुन्नागपत्रं०॥शिवायेन
मः॥कदंबपत्रं०॥भवान्येनमः॥मरुवकपत्रं०॥रुद्राण्येन
मः॥दाडिमिपत्रं०॥सर्वाण्येनमः॥रसालपत्रं०॥मंगल
दात्र्येनमः॥मल्लिकापत्रं०॥पुत्रदायेनमः॥पाटलीप
त्रं०॥वस्त्रेनेतिरसोधूपोगंधाढ्योगंधउत्तम॥आघ्रे
यःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥धूपं॥आज्यंचव

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

र्त्तिसंभूतंवह्निनायोजितंमया॥हीपंगृहाणदेवेशत्रैलो
क्यंत्रिमिरापहं॥हीपं॥नैवेद्यंगृह्यतांदेवभक्तिंमेह्यच
लांकुरु॥ईप्सितंमेवरंदेहिपरत्रचपरांगतिं॥नैवेद्यं॥
उत्तरापोशानं॥करोद्वर्तनं॥इदंफलंमयादेवस्थापितं
पुरतस्तव॥तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥
फलं॥पूगीफलंमहद्दिव्यंनागवल्यादलैर्युतं॥कर्पू
रैलासमायुक्तंतांबूलंप्रतिगृह्यतां॥मुखवासार्थं
तांबूलं॥हिरण्यगर्भगर्भस्तंहेमबीजंविभावसो॥
अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥दक्षिणां॥ ५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उत्तरदीपं॥नीराजयामिदेवेशत्रैलोक्यतिमिरापह॥
आर्त्तिक्याहंकरिष्यामिप्रसीदपरमेश्वर॥कर्पूरदीपं॥
कर्पूरखंडसंयुक्तंदीपंप्रज्वलितंमया॥गृहाणभ
क्त्याहदेवेशत्रैलोक्यंमगलकुरु॥ानिकानिचपापानि
जन्मांतरकृतानिच॥तानितानिविनश्यंतिप्रदक्षि
णपदे॥प्रदक्षिणं॥सर्वमंगलमांगल्येशिवेसर्वा
र्थसाधिके॥शरण्येत्र्यंबकेगौरीनारायणीनमो
स्तुते॥नमस्कारान्॥नानाविधानिपुष्पाणिस्व
हस्तेनाहृतानिच॥पुष्पांजलिंकरिष्यामिप्रसीदप

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रमेश्वरी॥पुष्पांजलिं॥सौभाग्यवायनं॥ततोवैष्णवपात्रे
तुसौभाग्यद्रव्यमाक्षिपेत्॥अन्नंकंचुकिसंयुक्तंसव
स्त्रफलदक्षिणां॥वायनंगौरिविप्रायदद्मिप्रीतयेत
व॥सौभाग्यारोग्यकामानांसर्वसंपत्समृद्धये॥गौरी
गिरिप्रपुष्पार्थंवायनंतेददाम्यहं॥इतिमंत्राभ्यांवाय
नंदद्यात्॥आवाहनंनजानामिनजानामितवार्चनं॥
पूजांचैवनजानामिक्षंमितांपरमेश्वर॥गतंदुःखंगतं
पापंगतंदारिद्र्यमेवच॥आगताःसुखसंपत्तिःपुण्या
हंतवदर्शनात्॥अन्यथाशरणंनास्तित्वमेवशरणं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मम॥तस्मात्कारुण्यभावेनरक्षरक्षपरमेश्वर॥यत्कृतक
र्मणाश्रीशंकरेणसखिसहितहरितालिकाप्रीयतांनम
म॥इतिहरितालिकापूजासमाप्तः॥ ७॥ ७॥ ७॥ ७
ॐतत्सद्ब्रह्मार्पणमस्तु॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥
विशेषअर्घ्येण प्रवालमुक्ताफलपूगरंभाजंबूनदाद्यैर
पि-पाद्यगंधैः॥पुष्पाक्षतैर्युक्तममोघमर्घंददामिभार्घ्यं स
फलाकुरुष्व॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥अथहरितालिकापूजासमाप्तः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi